श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ब्रह्माण्ड पुराणे

# ॥ श्रीघटिकाचलहनुमत्स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीघटिकाचलहनुमत्स्तोत्रम् ॥

अतिपाटलवक्त्राब्जं धृतहेमाद्रिविग्रहम्।
आञ्जनेयं शङ्खचक्रपाणिं चेतसि धीमहि॥ १ ॥

श्रीयोगपीठविन्यस्तव्यत्यस्तचरणाम्बुजम्।
दरार्यभयमुद्राक्षमालापट्टिकया युतम्॥ २ ॥

पारिजाततरोर्मूलवासिनं वनवासिनम्।
पश्चिमाभिमुखं बालं नृहरेर्ध्यानसंस्थितम्॥ ३ ॥

सर्वाभीष्टप्रदं नृणां हनुमन्तमुपास्महे।

नारद उवाच
स्थानानामुत्तमं स्थानं किं स्थानं वद मे पितः।

ब्रह्मोवाच
ब्रह्मन् पुरा विवादोऽभूत् नारायणकपीशयोः॥

तत् तेऽहं सम्प्रवक्ष्यामि सावधानमनाः शृणु।
एकमासाद्वरदः साक्षात् द्विमासाद्रङ्गनायकः॥ १ ॥

मासार्धेन प्रवक्ष्यमि तथा वै वेङ्कटेश्वरः।
अर्धमासेन दास्यामि कृतं तु परमं शिवम्॥ २ ॥

घटिकाचलसंस्थानाद्घटिकाचलवल्लभः।
हनुमानञ्जनासूनु रामभक्तो जितेन्द्रियः॥ ३ ॥

घटिकादेव काम्यानां कामदाता भवाम्यहम्।
शङ्खचक्रप्रदो येन प्रदास्यामि हरेः पदम्॥ ४ ॥

www.prapatti.com

घटिकाचलसंस्थाने घटिकां वसते यदि।
स मुक्तः सर्वलोकेषु वायुपुत्रप्रसादतः॥ ५ ॥

ब्रह्मतीर्थस्य निकटे राघवेन्द्रस्य सन्निधौ।
वायुपुत्रं समालोक्य न भयं विद्यते नरे॥ ६ ॥

तस्माद्वायुसुतस्थानं पवित्रमतिदुर्लभम्।
पूर्वाब्धेः पश्चिमे भागे दक्षिणाब्धेस्तथोत्तरे॥ ७ ॥

वेङ्कटाद्दक्षिणे भागे पर्वते घटिकाचले।
तत्रैव ऋषयः सर्वे तपस्तप्यन्ति सादरम्॥ ८ ॥

पञ्चाक्षरमहामन्त्रं द्विषट्कं च द्विजातिनाम्।
नाममन्त्रं ततः श्रीमन् स्त्रीशूद्राणामुदाहृतम्॥ ९ ॥

तत्र स्नात्वा ब्रह्मतीर्थे नत्वा तं वायुमन्दिरे।
वायुपुत्रं भवेन्नित्यं सर्वारिष्टविवर्जितः॥ १० ॥

सेवते मण्डलं नित्यं तथा वै ह्यर्धमण्डलम्।
वाञ्छितं विन्दते नित्यं वायुपुत्रप्रसादतः।
तस्मात्त्वमपि भोः पुत्र निवासं घटिकाचले॥ ११ ॥

नारद उवाच
कथं वासः प्रकर्तव्यो घटिकाचलमस्तके।
केन मन्त्रेण बलवानाञ्जनेयः प्रसीदति॥ १२ ॥

विधानं तस्य मन्त्रस्य होमं चैव विशेषतः।
कियत्कालं तत्र वासं कर्तव्यं तन्ममावद॥ १३ ॥

ब्रह्मोवाच
ब्रह्मतीर्थे ततः स्नात्वा हनुमत्संमुखे स्थितः।
द्वादशाक्षरमन्त्रं तु नित्यमष्टसहस्रकम्॥ १४ ॥

www.prapatti.com

जपेन्नियमतः शुद्धस्तद्भक्तस्तु परायणः।
निराहारः फलाहारो ब्रह्मचर्यव्रते स्थितः॥ १५ ॥

मण्डलं तत्र वस्तव्यं भक्तियुक्तेन चेतसा।
ध्यानश्लोकं प्रवक्ष्यामि शृणु नारद तत्वतः॥ १६ ॥

तमञ्जनानन्दनमिन्दुबिम्ब-
निभाननं सुन्दरमप्रमेयम्।
सीतासुतं सूक्ष्मगुणस्वदेहं
श्रीरामपादार्पणचित्तवृत्तिम्॥ १७ ॥

एवं ध्यात्वा सदा भक्त्या तत्पादजलजं मुदा।
चतुर्थांशेन होमं वा कर्तव्यं पायसेन च॥ १८ ॥

विधिना विधियुक्तस्तु विदित्वा घटिकाचलम्।
जगाम जयमन्विच्छन्निन्द्रियाणां महामनाः॥ १९ ॥

एवं नियमयुक्तः सन् यः करोति हरेः प्रियम्।
विजयं विन्दते देही वायुपुत्रप्रसादतः॥ २० ॥

॥ इति श्रीघटिकाचलहनुमत्स्तोत्रं संपूर्णम् ॥

www.prapatti.com